# CHINMAYA MISSION CHICAGO
## Bhajan Sandhyā

नाहं वसामि वैकुण्ठे योगिनां हृदये न च ।
मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ॥

nāhaṁ vasāmi vaikuṇṭhe yogināṁ hṛdaye na ca |
madbhaktā yatra gāyanti tatra tiṣṭhāmi nārada ||



**Pujya Gurudev Swami Chinmayānandaji**

**(Please return this booklet at the end of bhajan sandhyā)**

Please return this book after the Bhajan.
If you want a copy, please contact the Mission.

# Contents


| | |
|---|---|
| Shanti Mantra | 1 |
| Ganesha Mantra | 1 |
| Saraswati Mantra | 1 |
| Guru Mantras | 2 |
| Vishnu Mantra | 3 |
| Lakshmi Mantra | 3 |
| Shiva Mantra | 3 |
| Narayani Mantra | 4 |
| Krishna Mantra | 4 |
| Rama Mantra | 5 |
| Hanumat Mantra | 5 |
| Surya Mantra | 6 |
| Ekasloki- Bhagavatam | 6 |
| Ekasloki-Ramayanam | 6 |
| Sri Tapovanashatkam | 7 |
| Sri Hanuman Chalisa | 9 |
| Nirvanashatkam | 15 |
| Mahamrtyunjaya Mantra | 16 |
| Concluding Prayers | 16 |
| Chinmaya Mission Pledge | 18 |
| Sri Chinmaya Aarati | 19 |
| Jaya Jagadisha Hare | 20 |
| Vedic Aarati | 22 |

## śāntiḥ mantra

ॐ सह नाववतु । सह नौ भुनक्तु ॥
सहवीर्यं करवा वहै ।
तेजस्वि नावधीतमस्तु मा विद्विषावहै ।
ॐ शान्तिः शान्तिः शान्तिः ॥

om saha naavavatu | saha nau bhunaktu ||
sahavīryaṁ karavā vahai |
tejasvi nāvadhītamastu mā vidviṣāvahai |
om śāntiḥ śāntiḥ śāntiḥ ||

## gaṇeśa mantra

गजाननं भूतगणादि सेवितम्
कपित्थ जम्बूफल सारभक्षितम् ।
उमासुतं शोक विनाशकारणम्
नमामि विघ्नेश्वर पाद पङ्कजम् ॥

gajānanaṁ bhūtagaṇādi sevitaṁ
kapittha jaṁbūphala sārabhakṣitaṁ |
umāsutaṁ śoka vināśakāraṇaṁ
namāmi vighneśvara pāda paṅkajam ||

## sarasvatī mantra

या कुन्देन्दु तुषार हार धवला याशुभ्र वस्त्रावृता
या वीणावर दन्डमन्डित करा या श्वेत पद्मासना ।
या ब्रह्माच्युतशङ्करप्रभृतिभिः देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्या पहा ॥

yā kundendu tuṣāra hāra dhavalā yāśubhra vastrāvṛtā
yā vīṇāvara daṇḍamaṇḍita karā yā śveta padmāsanā |
yā brhmācyutaśaṅkaraprabhṛtibhiḥ devaiḥ sadā vanditā
sā māṁ pātu sarasvatī bhagavatī niśśeṣajāḍyā pahā ||

## guru mantras

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ १ ॥
akhaṇḍamaṇḍalākāraṁ vyāptaṁ yena carācaram |
tatpadaṁ darśitaṁ yena tasmai śrīgurave namaḥ ||

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः
ajñānatimirāndhasya jñānāñjanaśalākayā |
cakṣurunmīlitaṁ yena tasmai śrīgurave namaḥ ||

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ ३ ॥
gururbrahmā gururviṣṇuḥ gururdevo maheśvaraḥ |
gurureva paraṁ brahma tasmai śrīgurave namaḥ ||

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देवदेव ॥
tvameva mātā ca pitā tvameva
tvameva bandhuśca sakhā tvameva |
tvameva vidyā draviṇaṁ tvameva
tvameva sarvaṁ mama devadeva ||

## viṣṇu mantra

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

śāntākāraṁ bhujagaśayanaṁ padmanābhaṁ sureśaṁ
viśvādhāraṁ gaganasadṛśaṁ meghavarṇaṁ śubhāṅgam ।
lakṣmīkāntaṁ kamalanayanaṁ yogibhirdhyānagamyaṁ
vande viṣṇuṁ bhavabhayaharaṁ sarvalokaikanātham ॥

## lakṣmī mantra

लक्ष्मीं देवीं कनकरुचिरां विष्णुपत्नीं सुहासाम्
गौरीं देवीं पशुपतिं मनोल्लासिनीं अर्धनारीम् ।
वाणीं देवीं सुरवरनुतां सर्वकामार्थ सिध्यै
वन्दे ब्रह्म प्रियतमसतिं सर्व विद्या प्रदात्रीम् ॥

lakṣmīṁ devīṁ kanakarucirāṁ viṣṇupatnīṁ suhāsām
gaurīṁ devīṁ paśupatiṁ manollāsinīṁ ardhanārīm ।
vāṇīṁ devīṁ suravaranutāṁ sarvakāmārtha sidhdyai
vande brahma priyatamasatiṁ sarva vidyā a pradātrīm ॥

## śiva mantra

वन्दे शम्भुमुमापतिं सुरगुरुं वन्दे जगत्कारणम्
वन्दे पन्नगभूषणं शशिधरं वन्दे पशूनां पतिम् ।
वन्दे सुर्य शशाङ्क वह्नि नयनं वन्दे मुकुन्द प्रियम्
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवंशङ्करम् ॥

vande śaṁbhumumāpatiṁ suraguruṁ vande jagat kāraṇam
vande pannagabhūṣaṇaṁ śaśidharaṁ vande paśūnāṁ patim
vande surya śaśāṅka vahni nayanaṁ vande mukunda priyam
vande bhaktajanāśrayaṁ ca varadaṁ vande śivaṁśaṅkaram ॥

## nārāyaṇi mantra

सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्र्यम्बके गौरी नारायणि नमोऽस्तु ते ॥
शरणागत दिनार्त परित्राण परायणी ।
सर्वस्यार्ति हरे देवि नारायणि नमोऽस्तु ते ॥

sarvamaṅgala māṅgalye śive sarvārtha sādhike |
śaraṇye tryaṁbake gaurī nārāyaṇi namo'stu te ||
śaraṇāgata dinārta paritrāṇa parāyaṇī |
sarvasyārti hare devi nārāyaṇi namo'stu te ||

## kṛṣṇa mantra

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकी परमानन्दं कृष्णं वन्दे जगद्गुरुम्
मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम्।
यत्कृपा तमहं वन्दे परमानन्द माधवम् ॥
कृष्णाय वासुदेवाय हरये परमात्मने ।
प्रणतः क्लेशनाशाय गोविन्दाय नमो नमः ॥

vasudevasutaṁ devaṁ kaṁsacāṇūramardanam |
devakī paramānandaṁ kṛṣṇaṁ vande jagadgurum
mūkaṁ karoti vacālama paṅguṁ laṅghayate giriṁ |
yat kṛpa tamahaṁ vande paramānanda mādhavam ||
kṛśaṇāya vāsudevāya haraye paramātmane |
praṇataḥ kleśanāśāya govindāya namo namaḥ ||

कस्तूरितिलकं ललाटपटले वक्षःस्थले कौस्तुभं
नासाग्रे नवमौक्तिकं करतले वेणुं करे कङ्कणम् ।
सर्वाङ्गे हरिचन्दनं सुललितं कन्ठे च मुक्तावलिं
गोपस्त्री परिवेष्ठितो विजयते गोपाल चुडामणिम् ॥

kastūritilakaṁ lalāṭapaṭale vakṣassthale kaustubhaṁ
nāsāgre navamauktikaṁ karatale veṇuṁ kare kaṅkaṇam ।
sarvāṅge haricandanaṁ sulalitaṁ kanṭhe ca muktāvaliṁ
gopastrī parivesṭhito vijayate gopāla cudāmaṇim ॥

## rāma mantra

वैदेहीसहितं सुरद्रुमतले हैमे महामन्डपे
मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितम्
अग्रेवाचयति प्रभञ्जनसुते तत्वं मुनिभ्यःपरं
व्याखान्तं भरतादिभिः परिवृतं रामम्भजे श्यामलम् ॥

vaidehīsahitaṁ suradrumatale haieme mahāmanḍape
madhyae puṣpakamāsane maṇimaye vīrāsane susthitam
agrevācayati prabhañjana sute tatvaṁ munibhyaḥparaṁ
vyākhāntaṁ bhartādibhiḥ parivṛtaṁ rāmaṁbhaje śyāmalam ॥

श्री राम राम रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं रामनाम वरानने ॥

śrī rāma rāma rāmeti rame rāme manorame ।
sahasranām tattulyaṁ rāmanāma varānane ॥

## hanumat mantra

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ॥

manojavaṁ mārutatulyavegaṁ jitendriyaṁ buddhimatāṁ variṣṭham ।
vātātmajaṁ vānarayūthamukhyaṁ śrīrāmadūtaṁ śirasā namāmi ॥

## sūrya mantra

नमः सवित्रे जगदेकचक्षुषे जगत् प्रसूतिः स्थिति नाश हेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चिनारायण शङ्करात्मने ॥

namaḥ savitrae jagadekacakṣuṣe jagat prasūtiḥ sthiti nāśa hetave |
trayīmayāya triguṇātmadhāriṇe viriñcinārāyaṇa śaṅkarātmane ||

## ekaślokī-bhāgavatam

आदौ देवकि देवि गर्भ जननं गोपीगृहे वर्धनं
मायापूतन जीवितापहरणं गोवर्धनोद्धारणम् ।
कंसच्छेदन कौरवादि हननं कुन्तिसुतां पालनं
एतद् भागवतं पुराणकथितं श्रीकृष्ण लीलामृतम् ॥

ādau devaki devi garbha jananaṁ gopīgṛhe vardhanaṁ
maāyāpūtana jīvitāpaharaṇaṁ govardhanoddhāraṇam |
kaṁsacchedana kauravādi hananaṁ kuntisutāṁ pālanaṁ
etad bhāgavataṁ purāṇakathitaṁ śrīkṛṣṇa līliamṛtam ||

## ekaślokī-rāmāyaṇam

आदौ राम तपोवनादि गमनं हत्वा मृगं काञ्चनं
वैदेही हरणं जटायु मरणं सुग्रीव सम्भाषणं ।
वाली निग्रहणं समुद्र तरणं लङकापुरी दाहनं
पश्चात् रावण कुम्भकर्ण हननं एतद्धि रामायणम् ॥

ādau rāma tapovanādi gamanaṁ hatvā mṛgaṁ kāñcanaṁ
vaidehī haraṇaṁ jaṭāyu maraṇaṁ sugrīva saṁbhāṣaṇaṁ |
vāli nigrahaṇaṁ samudra taraṇaṁ laṅakāpurī dāhanaṁ
paścāt rāvaṇa kumbhakarṇa hananaṁ etaddhi rāmāyaṇam ||

आकाशात् पतितं तोयं यथागच्छति सागरम् ।
सर्वदेव नमस्कारः केशवं प्रतिगच्छति ॥

ākāśāt patitaṁ toyaṁ yathāgacchati sāgaram |
sarvadeva namaskāraḥ keśavaṁ pratigacchati ||



SATGURU H.H. SWAMI TAPOVAN

# Sri Tapovanashatkam

## श्री तपोवनषट्कम्

व्याप्तं जगद्येन चिदात्मभावात्  रज्ज्वा यथाऽहिर्हि चराचरं यत् ।
संन्यस्य सर्वं च सदात्मभावे   स्वयं समस्तं च बभूव यस्तु ॥
निसङ्ग निर्मुक्तिपदं प्रपद्य   ब्रह्मात्मभावेन विराजितो यः ।
श्री सौम्यकाशीश महेश्वराय  तस्मै नमः स्वामि तपोवनाय ॥ १ ॥

vyāptaṁ jagadyena cidātmabhāvāt rajjvā yathā'hirhi carācaraṁ yat |
saṁnyasya sarvaṁ ca sadātmabhāve svayaṁ samastaṁ ca babhūva yastu ||
nisaṅga nirmuktipadaṁ prapadya brahmātmabhāvena virājito yaḥ |
śrī saumyakāśīśa maheśvarāya tasmai namaḥ svāmita povanāya || 1 ||

अखण्डभावः शिवरूपतत्त्वः  चिति स्वभावः परमात्मसत्यः ।
सत्यस्य सत्यः सुधियैव गम्यः  परः प्रधानात्परमेश्वरो यः ॥
आद्यन्तहीनो निरपेक्षदीप्तिः  स्वतः स्वरूपेण विफुल्लितो यः ।
श्री सौम्यकाशीश महेश्वराय  तस्मै नमः स्वामि तपोवनाय ॥ २ ॥

akhaṇḍabhāvaḥ śivarūpatattvaḥ  citi svabhāvaḥ paramātmasatyaḥ |
satyasya satyaḥ sudhiyaiva gamyaḥ  paraḥ pradhānātparameśvaro yaḥ ||
ādyantahīno nirapekṣadīptiḥ  svataḥ svarūpeṇa viphullito yaḥ |
śrī saumyakāśīśa maheśvarāya tasmai namaḥ svāmi tapovanāya || 2 ||

मन्तुन्न शक्यो मनसा कदाचित्  वक्तुं न केनापि तथा न वाचा ।
बोद्धुं च बुद्ध्यादि तथा न शक्यो  बुद्ध्यादि साक्षी खलु केवलो यः ॥
सर्वेन्द्रियातीत पदस्थितोऽपि  सर्वेन्द्रिय प्रेरयितापरो यः ।
श्री सौम्यकाशीश महेश्वराय  तस्मै नमः स्वामि तपोवनाय ॥ ३ ॥

mantunna śakyo manasā kadācit vaktuṁ na kenāpi tathā na vācā ।
boddhuṁ ca buddhayādi tathā na śakyo buddhayādi sākṣī khalu kevalo yaḥ ॥
sarvendriyātī tapadasthito'pi sarvendriya prerayitāparo yaḥ ।
śrī saumyakāśīśa maheśvarāya tasmai namaḥ svāmi tapovanāya ॥ 3 ॥

शुद्धाति शुद्धं च सदा प्रबुद्धो विश्वेश्वरो विश्वपरः प्रसन्नः ।
व्यापी परब्रह्मणि मोदमानो वेदान्त सारः सुधियां शरण्यः ॥
एको वशी सर्वभूताधिवासः सर्वाधिपः सर्वजीवात्मको यः ।
श्री सौम्यकाशीश महेश्वराय तस्मै नमः स्वामि तपोवनाय ॥ ४ ॥

śuddhāti śuddhaṁ ca sadā prabuddho viśveśvaro viśvaparaḥ prasannaḥ ।
vyāpī parabrahmaṇi modamāno vedānta sāraḥ sudhiyāṁ śaraṇyaḥ ॥
eko vaśī sarvabhūtādhivāsaḥ sarvādhipaḥ sarvajīvātmako yaḥ ।
śrī saumyakāśīśa maheśvarāya tasmai namaḥ svāmita povanāya ॥ 4 ॥

अशब्दमस्पर्शमरूपवच्च तथारसं नित्यमगन्धवच्च ।
निरञ्जनंनित्यनिरीहमेकं बुद्धेः परं निर्गुण सद्ध्रुवं च ॥
गुह्यं गभीरं गगनोपमं यं पश्यन्ति निर्द्धूतमला यतीन्द्राः ।
श्री सौम्यकाशीश महेश्वराय तस्मै नमः स्वामि तपोवनाय ॥ ५ ॥

aśabdamasparśamarūpavacca tathārasaṁ nityamagandhavacca ।
nirañjanaṁnityanirīhamekaṁ buddheḥ paraṁ nirguṇa saddhruvaṁ ca ॥
guhyaṁ gabhīraṁ gaganopamaṁ yaṁ paśyanti nirddhūtamalā yatīndrāḥ ।
śrī saumyakāśīśa maheśvarāya tasmai namaḥ svāmi tapovanāya ॥ 5 ॥

तेजोमयं दिव्यममेयशक्तिं सनातनं शान्तमनामयं च ।
अद्वैतमाश्चर्यमचिन्त्यरूपं परात्परं नित्यमनन्तमाद्यम् ॥
ज्ञानप्रकाशेन विशुद्धसत्त्वो यं पश्यति स्वात्मनि चिन्त्यमानम् ।
श्री सौम्यकाशीश महेश्वराय तस्मै नमः स्वामि तपोवनाय ॥ ६ ॥

*tejomayaṁ divyamameyaśaktiṁ sanātanaṁ śāntamanāmayaṁ ca* ।
advaitamāścaryamacintyarūpaṁ parātparaṁ nityamanantamādyam ॥
jñānaprakāśena viśuddhasattvo yaṁ paśyati svātmani cintyamānam ।
śrī saumyakāśīśa maheśvarāya tasmai namaḥ svāmi tapovanāya ॥ 6 ॥



## Sri Hanuman Chalisa ( श्री हनुमानचालीसा )

दोहा :

श्री गुरु चरन सरोज रज निज मनु मुकुरु सुधारि ।
बरनउँ रघुबर बिमल जसु जो दायकु फल चारि ॥ १ ॥
śrī guru carana saroja raja nija manu mukuru sudhāri ।
baranaū raghubara bimala jasu jo dyaku phala cāri ॥ 1 ॥

बुद्धिहीन तनु जानिके सुमिरौ पवन कुमार ।
बल बुद्धि विद्या देहु मोहि हरहु कलेस बिकार ॥ २ ॥
buddhihīna tanu jānike sumiraun pavana kumāra ।
bala buddhi vidya dehu mohi harahu kalesa bikra ॥ 2 ॥

चौपाई :

जय हनुमान ज्ञान गुन सागर ।
जय कपीस तिहुँलोक उजागर ॥ १ ॥
jaya hanumāna jñāna guna sāgara ।
jaya kapīsa tihuloka ujāgara ॥ 1 ॥

रामदूत अतुलित बलधामा ।
अंजनि-पुत्र पवन-सुत नामा ॥ २ ॥
rāmadūta atulita baladhāmā ।
anjani-putra pavana-suta nāma ॥ 2 ॥

महाबीर बिक्रम बजरङ्गी ।
कुमति निवार सुमति के सङ्गी ॥ ३ ॥
mahābīra bikrama bajaraṅgī ।
kumati nivāra sumati ke saṅgī ॥ 3 ॥

कंचन बरन बिराज सुबेसा ।
कानन कुंडल कुंचित केसा ॥ ४ ॥
kañcana barana birāja subesā ।
kānana kuṇḍala kuñcita kesā ॥ 4 ॥

हाथ बज्र और ध्वजा बिराजे ।
काँधे मूँज जनेऊ साजै ॥ ५ ॥
hātha bajra aur dhvajā birjai ।
kāñdhe mūnja janeū sājai ॥ 5 ॥

संकर-सुवन केसरी-नन्दन ।
तेज प्रताप महा जग-बन्दन ॥ ६ ॥
saṅkara-suvana kesarī-nandana ।
teja pratāpa mahā jaga-bandana ॥ 6 ॥

विद्यावान गुनी अति चातुर ।
राम काज करिबे को आतुर ॥ ७ ॥
vidyāvāna gunī ati cātura ।
rāma kāja karibe ko ātura ॥ 7 ॥

प्रभु चरित्र सुनिबे को रसिया ।
रामलखन सीता मन बसिया ॥ ८ ॥
prabhu caritra sunibe ko rasiyā ।
rāmalakhana sītā mana basiyā ॥ 8 ॥

सूक्ष्म रूप धरि सियहिं दिखावा ।
बिकट रूपधरि लंक जरवा ॥ ९ ॥
sūkṣma rūpa dhari siyahiṅ dikhāvā ।
bikaṭa rūpadhari laṅka jarvā ॥ 9 ॥

भीम रूप धरि असुर संहारे ।
रामचन्द्र के काज सँवारे ॥ १० ॥
bhīma rūpa dhari asura saṁhre ।
rāmacandra ke kāja saṁvāre ॥ 10 ॥

लाय संजीवन लखन जियाये ।
श्री रघुबीर हरषि उर लाये ॥ ११ ॥
lāya saṁjīvana lakhana jiyāye ।
śrī raghubīra haraṣi ura lāye ॥ 11 ॥

रघुपति कीन्ही बहुत बडाई ।
तुम मम प्रिय भरतहि सम भाई ॥ १२ ॥
raghupati kīnhī bahuta baḍāī ।
tuma mama priya bharatahi sama bhāī ॥ 12 ॥

सहस बदन तुम्हरो जस गावै ।
अस कहि श्रीपति कण्ठ लगावै ॥ १३ ॥
sahasa badana tumharo jasa gāvai ।
asa kahi śrīpati kaṇṭha lagāvai ॥ 13 ॥

सनकादिक ब्रह्मादि मुनीसा ।
नारद सारद सहित अहीसा ॥ १४ ॥
sanakādika brahmādi munīsā ।
nārada sārada sahita ahīsā ॥ 14 ॥

जम कुबेर दिगपाल जहाँ ते ।
कबि कोबिद कहि सके कहाँ ते ॥ १५ ॥
jama kubera digapāla jahṁ te ।
kabi kobida kahi sake kahṁ te ॥ 15 ॥

तुम उपकार सुग्रीवहि कीन्हा ।
राम मिलाय राजपद दीन्हा ॥ १६ ॥
tuma upakāra sugrīvahi kīnhā ।
rāma milāya rājapada dīnhā ॥ 16 ॥

तुम्हरो मन्त्र बिभीषन माना ।
लंकेस्वर भए सब जग जाना ॥ १७ ॥
tumharo mantra bibhīṣana mānā ।
laṅkesvara bhaye saba jaga jānā ॥ 17 ॥

जुग सहस्र जोजन पर भानू ।
लील्यो ताहि मधुर फल जानू ॥ १८ ॥
juga sahasra jojana para bhānū ।
līlyo tāhi madhura phala jānū ॥ 18 ॥

प्रभु मुद्रिका मेलि मुख माहीं ।
जलधि लाँघि गये अचरज नाहीं ॥ १९ ॥
prabhu mudrikā meli mukha māhīṁ ।
jaladhi lāṁghi gaye acaraja nāhīṁ ॥ 19 ॥

दुर्गम काज जगत के जेते ।
सुगम अनुग्रह तुम्हरे तेते ॥ २० ॥
durgama kāja jagata ke jete ।
sugama anugraha tumhare tete ॥ 20 ॥

राम दुआरे तुम रखवारे ।
होत न आज्ञा बिनु पैसारे ॥ २१ ॥
rāma duāre tuma rakhavāre ।
hota na ājñā binu paisāre ॥ 21 ॥

सब सुख लहै तुम्हारी सरना ।
तुम रच्छक काहू को डर ना ॥ २२ ॥
saba sukha lahai tumhārī saranā |
tuma racchaka kāhū ko ḍara nā || 22 ||

आपन तेज सम्हारो आपै ।
तीनों लोक हाँक ते काँपै ॥ २३ ॥
āpana teja samhāro āpai |
tīno loka hāka te kampai || 23 ||

भूत पिशाच निकट नहिं आवै ।
महाबीर जब नाम सुनावै ॥ २४ ॥
bhūta piśāca nikaṭa nahi āvai |
mahābīra jaba nāma sunāvai || 24 ||

नासै रोग हरै सब पीरा ।
जपत निरन्तर हनुमत बीरा ॥ २५ ॥
nāsai roga harai saba pīrā |
japata nirantara hanumata bīrā || 25 ||

संकट ते हनुमान छुडावै ।
मन क्रम बचन ध्यान जो लावै ॥ २६ ॥
saṅkaṭa te hanumāna chuḍāvai |
mana krama bacana dhyāna jo lāvai || 26 ||

सब पर राम तपस्वी राजा ।
तिनके काज सकल तुम साजा ॥ २७ ॥
saba para rāma tapasvī rājā |
tinake kāja sakala tuma sājā || 27 ||

और मनोरथ जो कोई लावै ।
सोइ अमित जीवन फल पावै ॥ २८ ॥
aura manoratha jo koī lāvai |
soi amita jīvana phala pāvai || 28 ||

चारो जुग परताप तुम्हारा ।
है परसिद्ध जगत उजियारा ॥ २९ ॥
cāro juga paratāpa tumhārā |
hai parasiddha jagata ujiyārā || 29 ||

साधु सन्त के तुम रखवारे ।
असुर निकन्दन राम दुलारे ॥ ३० ॥
sādhu santa ke tuma rakhavāre ।
asura nikandana rāma dulāre ॥ 30 ॥

अष्टसिद्धि नौ निधि के दाता ।
अस बर दीन्ह जानकी माता ॥ ३१ ॥
aṣṭasiddhi nau nidhi ke dtā ।
asa bara dīnha jānakī mātā ॥ 31 ॥

राम रसायन तुम्हरे पासा ।
सदा रहो रघुपति के दासा ॥ ३२ ॥
rāma rasāyana tumhare pāsā ।
sadā raho raghupati ke dāsā ॥ 32 ॥

तुम्हरे भजन राम को पावै ।
जनम जनम के दुख बिसरावै ॥ ३३ ॥
tumhare bhajana rāma ko pāvai ।
janama janama ke dukha bisarvai ॥ 33 ॥

अन्त काल रघुबर पुर जाई ।
जहाँ जन्म हरिभक्त कहाई ॥ ३४ ॥
anta kāla raghubara pura jāī ।
jahā janma haribhakta kahāī ॥ 34 ॥

और देवता चित्त न धरई ।
हनुमत सेइ सर्ब सुख करई ॥ ३५ ॥
aur devatā citta na dharaī ।
hanumata sei sarba sukha karaī ॥ 35 ॥

संकट कटै मिटै सब पीरा ।
जो सुमिरै हनुमत बलबीरा ॥ ३६ ॥
saṁkaṭa kaṭai miṭai saba pīrā ।
jo sumirai hanumata balabīrā ॥ 36 ॥

जै जै जै हनुमान गोसाईं ।
कृपा करहु गुरुदेव की नाईं ॥ ३७ ॥
jai jai jai hanumāna gosāin ।
kṛpā karahu gurudeva kī nāī ॥ 37 ॥

जो सत बार पाठ कर कोई ।
छूटहि बन्दि महा सुख होई ॥ ३८ ॥
jo sata bāra pāṭha kara koī ।
chūṭahi bandi mahā sukha hoī ॥ 38 ॥

जो यह पढै हनुमान चालीसा ।
होय सिद्धि साखी गौरीसा ॥ ३९ ॥
jo yaha paḍhai hanumāna cālīsā ।
hoya siddhi sākhī gaurīsā ॥ 39 ॥

तुलसीदास सदा हरि चेरा ।
कीजै नाथ हृदय महँ डेरा ॥ ४० ॥
tulasīdāsa sad hari cerā ।
kījai nātha hṛdaya mahaṁ ḍerā ॥ 40 ॥

दोहा :
पवनतनय संकट हरन मंगल मूरति रूप ।
राम लखन सीता सहित हृदय बसहु सुर भूप ॥
pavanatanaya sankaṭa harana mangala mūrati rūpa ।
rāma lakhana sītā sahita hridaya basahu sura bhūpa ॥

सियावर रामचन्द्र की जय
पवनसुत हनुमान की जय
उमापति महदेव की जय
बोलो भाइ सब सन्तन की जय
siyāvara rāmacandra kī jay
pavanasuta hanumāna kī jay
umāpati mahādeva kī jaya
bolo bhāi saba santana kī jay

## Nirvanashatkam ( निर्वाणषट्कम् )

मनोबुद्ध्यहङ्कारचित्तानि नाहं न च श्रोत्रजिह्वे न च घ्राणनेत्रे ।
न च व्योमभूमिर्न तेजो न वायुः चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ १ ॥

manobuddhayahaṅkāracittāni nāhaṁ na ca śrotrajihve na ca ghrāṇanetre ǀ
na ca vyomabhūmirna tejo na vāyuḥ cidānandarūpaḥ śivo'haṁ śivo'ham ǁ 1 ǁ

न च प्राणसंज्ञो न वै पञ्चवायुः न वा सप्तधातुर्न वा पञ्चकोशाः ।
न वाक्पाणिपादं न चोपस्थपायू चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ २ ॥

na ca prāṇasaṁjño na vai pañcavāyuḥ na vā saptadhāturna vā pañcakośāḥ ǀ
na vākpāṇipādaṁ na copasthapāyū cidānandarūpaḥ śivo'haṁ śivo'ham ǁ 2 ǁ

न मे द्वेषरागौ न मे लोभमोहौ मदो नैव मे नैव मात्सर्यभावः ।
न धर्मो न चार्थो न कामो न मोक्षः चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ३ ॥

na me dveṣarāgau na me lobhamohau mado naiva me naiva mātsaryabhāvaḥ ǀ
na dharmo na cārtho na kāmo na mokṣaḥ cidānandarūpaḥ śivo'haṁ śivo'ham ǁ 3 ǁ

न पुण्यं न पापं न सौख्यं न दुःखं न मन्त्रो न तीर्थं न वेदा न यज्ञः ।
अहं भोजनं नैव भोज्यं न भोक्ता चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ४ ॥

na puṇyaṁ na pāpaṁ na saukhyaṁ na duḥkhaṁ
na mantro na tīrthaṁ na vedā na yajñaḥ ǀ
ahaṁ bhojanaṁ naiva bhojyaṁ na bhoktā
cidānandarūpaḥ śivo'haṁ śivo'ham ǁ 4 ǁ

न मे मृत्युशङ्का न मे जातिभेदः पिता नैव मे नैव माता न जन्म ।
न बन्धुर्न मित्रं गुरुर्नैव शिष्यः चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ५ ॥

na me mṛtyuśaṅkā na me jātibhedaḥ pitā naiva me naiva mātā na janma ǀ
na bandhurna mitraṁ gururnaiva śiṣyaḥ cidānandarūpaḥ śivo'haṁ śivo'ham ǁ 5 ǁ

अहं निर्विकल्पो निराकाररूपः विभुर्व्याप्य सर्वत्र सर्वेन्द्रियाणाम् ।
सदा मे समत्वं न मुक्तिर्न बन्धः चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ६ ॥

ahaṁ nirvikalpo nirākārarūpaḥ vibhurvyāpya sarvatra sarvendriyāṇām ǀ
sadā me samatvaṁ na muktirna bandhaḥ cidānandarūpaḥ śivo'haṁ śivo'ham ǁ 6 ǁ

महामृत्युञ्जय मन्त्रः *mahāmṛtyuñjaya mantraḥ*

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनात् मृत्योर्मुक्षीय माऽमृतात् ॥

om tryambakaṁ yajāmahe sugandhiṁ puṣṭivardhanam ।
urvārukamiva bandhanāt mṛtyormukṣīya mā'mṛtāt ॥

## Concluding Prayers

वीर मारुति गंभीर मारुति धीर मारुति अति धीर मारुति
गीत मारुति संगीत मारुति दूत मारुति रामदूत मारुति
भक्त मारुति परमभक्त मारुति

vīra māruti gaṁbhīra māruti dhīra māruti ati dhīra māruti
gīta māruti saṁgīta māruti dūta māruti rāmadūta māruti
bhakta māruti paramabhakta māruti

ॐ नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकालाग्निकालाय
कालाग्निरुद्राय नीलकंठाय मृत्युञ्जयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ।

om namaste astu bhagavanviśveśvarāya mahādevāya

tryambakāya tripurāntakāya trikālāgnikālāya

kālāgnirudrāya nīlakanṭhāya mṛtyuñjayāya

sarveśvarāya sadaśivaaya śrīmanmahādevāya namaḥ ।

ॐ स्वस्ति प्रजाभ्यः परिपालयन्ताम् । न्यायेन मार्गेण मही महीशाः ॥
गो ब्राह्मणेभ्य शुभमस्तु नित्यं । लोकाः समस्ताः सुखिनो भवन्तु ॥

om svasti prajābhyaḥ paripālayantām ।
nyāyena mārgeṇa mahiṁ mahīśāḥ ॥
go brāhmaṇebhya śubhamastu nityaṁ ।
lokāḥ samastāḥ sukhino bhavantu ॥

काले वर्षतु पर्जन्यः पृथिवी शस्यशालिनी ॥
देशोयं क्षोभरहितः । ब्राह्मणास्सन्तु निर्भयाः ॥

kāle varṣatu parjanyaḥ । pṛthivī śasyaśālinī ॥
deśoyaṁ kṣobharahitaḥ । brāhmaṇāssantu nirbhayāḥ ॥

सर्वेषां स्वस्तिर्भवतु । सर्वेषां शान्तिर्भवतु ॥
सर्वेषां पूर्णंभवतु । सर्वेषां मंगलं भवतु ॥

sarveṣāṁ svastirbhavatu | sarveṣāṁ śāntirbhavatu ||
sarveṣāṁ pūrṇaṁ bhavatu | sarveṣāṁ mangalaṁ bhavatu ||

सर्वे भवन्तु सुखिनः । सर्वे सन्तु निरामयाः ॥
सर्वे भद्राणि पश्यन्तु । मा कश्चिद् दुःखभाग् भवेत् ॥

sarve bhavantu sukhinaḥ | sarve santu nirāmayāḥ ||
sarve bhadrāṇi paśyantu | mā kaścid duḥkhabhāg bhavet ||

असतो मा सद्गमय । तमसो मा ज्योतिर्गमय । मृत्योर्मा अमृतं गमय ॥

asato mā sadgamaya | tamaso mā jyotirgamaya |

mṛtyormā amṛtaṁ gamaya ||

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

om pūrṇamadaḥ pūrṇamidaṁ pūrṇāt pūrṇamudacyate |
pūrṇasya pūrṇamādāya pūrṇamevāvaśiṣyate ||

ॐ शान्तिः शान्तिः शान्तिः । हरिः ॐ । श्री गुरुभ्यो नमः । हरिः ॐ ॥

om śāntiḥ śāntiḥ śāntiḥ | hariḥ om | śrī gurubhyo namaḥ | hariḥ om ||

## Chinmaya Mission Pledge

We stand as one family
    bound to each other with love and respect.

We serve as an army,
    courageous and disciplined,
    ever ready to fight against
    all low tendencies and false values
    within and without us.

We live honestly
    the noble life of sacrifice and service
    producing more than what we consume
    and giving more than what we take.

We seek the Lord's grace
    to keep us on the path of virtue, courage, and wisdom.
May thy grace and blessings flow
    through us to the world around us.

We believe that the service of our country
    is the service of the Lord of Lords,
    and devotion to the people
    is devotion to the Supreme Self.

We know our responsibilities;
    give us the ability and courage to fulfill them.

OM TAT SAT

# श्री चिन्मय आरती śrī cinmaya āratī

आरती श्री चिन्मय सद्गुरु की
दिव्यरूप मूरति करुणा की।
आरती सद्गुरु की ॥

āratī śrī cinmaya sadgauru kī
divyarūpa mūrati karuṇā kī ।
āratī sadguru kī ॥

चरणों मे उनके शान्ति समाए
शरणागत की भ्रान्ति मिटाए
पाप ताप सन्ताप हरण की।
आरती श्री चिन्मय सद्गुरु की
आरती सद्गुरु की ॥

caraṇoṁ me unake śānti samāe
śaraṇāgata kī bhrānti miṭāe
pāpa tāpa santāpa haraṇa kī ।
āratī śrī cinmaya sadgauru kī
āratī sadguru kī ॥

वेद उपनिषद् गीता को गाया
धर्म सनातन फिर से जगाया
शुद्ध नीति प्रीति शङ्कर की।
आरती श्री चिन्मय सद्गुरु की
आरती सद्गुरु की ॥

veda upaniṣad gītā ko gāyā
dharma sanātana phira se jagāyā
śuddha nīti prīti śaṅkara kī ।
āratī śrī cinmaya sadgauru kī
āratī sadguru kī ॥

सिद्धबाडि की तपो भूमि मे
नित्य विराजे गुरु हमारे
भक्त हृदय आनन्द श्रोत की।
आरती श्री चिन्मय सद्गुरु की
आरती सद्गुरु की ॥

siddhabāḍi kī tapo bhūmi me
nitya virāje guru hamāre
bhakta hṛdaya ānanda śrota kī ।
āratī śrī cinmaya sadgauru kī
āratī sadguru kī ॥

| जय जगदीश हरे आरति (jaya jagadīśa hare ārati) | |
|---|---|
| ॐ जय जगदीश हरे<br>स्वामी जय दीनानाथ हरे<br>भक्तजनों के संकट दासजनों के संकट<br>क्षण में दूर करे ।<br>ॐ जय जगदीश .....। १ । | om jaya jagadīśa hare<br>svāmī jaya dīnānātha hare<br>bhaktajano ke sankaṭa<br>dāsajano ke sankaṭa<br>kṣaṇa me dūra kare ।<br>om jaya jagadīśa .....। 1 । |
| जो ध्यावे फल पावे<br>दुःख बिनसे मन का-स्वामी ....<br>सुख संपति घर आवे (२)<br>कष्ट मिटे तन का ।<br>ॐ जय जगदीश .....। २ । | jo dhyāve phala pāve<br>duḥkha binase mana kā-svāmī ....<br>sukha saṁpati ghara āve (2)<br>kaṣṭa miṭe tana kā ।<br>om jaya jagadīśa ..... । 2 । |
| मातपिता तुम मेरे<br>शरण गहूँ मे किसकी-स्वामी ....<br>तुम बिन और न दूजा<br>तुम बिन और न कोई<br>आशा करूँ मे जिसकी ।<br>ॐ जय जगदीश .....। ३ । | mātapitā tuma mere<br>śaraṇa gahū me kisakī-svāmī ....<br>tuma bina aura na dūjā<br>tuma bina aura na koī<br>āśā karūṁ me jisakī ।<br>om jaya jagadīśa .....। 3 । |
| तुम पूरन परमात्मा<br>तुम अन्तर्यामी-स्वामी ....<br>पर ब्रह्म परमेश्वर (२)<br>तुम सब के स्वामी ।<br>ॐ जय जगदीश .....। ४ । | tuma pūrana paramātmā<br>tuma antaryāmī-svāmī ....<br>para brahma parameśvara (2)<br>tuma saba ke svāmī ।<br>om jaya jagadīśa .....। 4 । |
| तुम करुणा के सागर<br>तुम पालनकर्ता स्वामी ....<br>मैं मूरख खल कामी<br>मैं सेवक तुम स्वामी<br>कृपा करो भरता ।<br>ॐ जय जगदीश .....। ५ । | tuma karuṇā ke sāgara<br>tuma pālanakartā svāmī ....<br>mai mūrakha khala kāmī<br>mai sevaka tuma svāmī<br>kṛpā karo bharatā ।<br>om jaya jagadīśa .....। 5 । |
| तुम हो एक अगोचर<br>सब के प्राणपती-स्वामी .... | tuma ho eka agocara<br>saba ke prāṇapati-svāmī .... |

| | |
|---|---|
| किस विध मिलूँ दयामय<br>किस विध मिलूँ कृपामय<br>तुमको मैं कुमती ।<br>ॐ जय जगदीश .....। ६ । | kisa vidha milū dayāmaya<br>kisa vidha milū kṛpāmaya<br>tumako mai kumatī ।<br>om jaya jagadīśa .....। 6 । |
| दीनबन्धु दुःख हरता<br>तुम रक्षक मेरे-स्वामी ....<br>अपने हाथ उठाओ<br>अपने चरण बढाओ<br>द्वार पडा तेरे ।<br>ॐ जय जगदीश .....। ८ । | dīnabandhu duḥkha haratā<br>tuma rakṣaka mere-svāmī ....<br>apane hātha uṭhāo<br>apane caraṇa baḍhāo<br>dvāra paḍā tere ।<br>om jaya jagadīśa ..... । 7 । |
| विषय विकार मिटाओ<br>पाप हरो देवा-स्वामी ....<br>श्रद्धा भक्ति बढाओ<br>श्रद्धा प्रेम बढाओ<br>संतन की सेवा ।<br>ॐ जय जगदीश .....। ८ । | viṣaya vikāra miṭāo<br>pāpa haro devā-svāmī ....<br>śraddhā bhakti baḍhāo<br>śraddhā prema baḍhāo<br>santana kī sevā ।<br>om jaya jagadīśa .....। 8 । |
| तन मन धन सब तेरा<br>सब कुछ है तेरा-स्वामी ....<br>तेरा तुझको अर्पण (२)<br>क्या लागे मेरा ।<br>ॐ जय जगदीश .....। ९ । | tana mana dhana saba terā<br>saba kucha hai terā-svāmī ....<br>terā tujhuko arpaṇa (2)<br>kyā lāge merā ।<br>om jaya jagadīśa .....। 9 । |

# Vedic Aārati

ॐ राजाधिराजाय प्रसह्यसाहिने नमो वयं वै श्रवणाय कुर्महे स मे कामान् कामकामाय मह्यम्, कामेश्वरो वै श्रवणो ददातु,
कुबेराय वै श्रवणाय महाराजाय नमः ।

om rājādhirājāya prasahyasāhine namo vayaṁ vai śravaṇāya kurmahe,
sa me kāmān kāmakāmāya mahyam kāmeśvarovai śravaṇo dadhātu,
kuberāya vai śravaṇāya mahārājāya namaḥ ।

ॐ न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः । परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति ॥

om na karmaṇā na prajayā dhanena tyāgenaike amṛtatvamānaśuḥ ।
pareṇa nākaṁ nihitaṁ guhāyāṁ vaibhrājate yadyatayo viśanti ॥

वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः । ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे ॥

vedāntavijñānasuniścitārthāḥ saṁnyāsayogādyatayaḥ śuddhasatvāḥ ।
te brahmaloke tu parāntakāle parāmṛtātparimucyanti sarve ॥

दह्रं विपापं परमेश्मभूतं यत् पुण्डरीकं पुरमध्यसंस्थम् । तत्रापि दह्रं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम् ॥

dahraṁ vipāpaṁ parameśmabhūtaṁ yat puṇḍarīkaṁ puramadhyasaṁstham ।
tatrāpi dahraṁ gaganaṁ viśokastasmin yadantastadupāsitavyam ॥

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः । तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥

yo vedādau svaraḥ prokto vedānte ca pratiṣṭhitaḥ ।
tasya prakṛtilīnasya yaḥ paraḥ sa maheśvarḥ ॥

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥

na tatra sūryo bhāti na candratārakaṁ nemā vidyuto bhānti kuto'yamagniḥ ।
tameva bhāntamanubhāti sarvaṁ tasya bhāsā sarvamidaṁ vibhāti ॥

ॐ नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णु प्रचोदयात् । ॐ महादेव्यै च विद्महे विष्णुपत्नी च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ॥

om nārāyaṇāya vidmahe vāsudevāya dhīmahi tanno viṣṇu pracodayāt ।
om mahādevyai ca vidmahe viṣṇupatnī ca dhīmahi । tanno lakṣmīḥ pracodayaat ॥

-------- HARIH OM -------

# 108 Names in Praise of Guru

## ॐ गुरुदेवानां पादपूजार्थं अष्टोत्तर शतनामावलिः

| | | |
|---|---|---|
| 1 | ॐ अजाय नमः | Om ajāya namaḥ |
| 2 | ॐ अव्ययाय नमः | Om avyayāya namaḥ |
| 3 | ॐ अविनाशिने नमः | Om avināśine namaḥ |
| 4 | ॐ अचिन्त्याय नमः | Om acintyāya namaḥ |
| 5 | ॐ अप्रमेयाय नमः | Om aprameyāya namaḥ |
| 6 | ॐ अद्वितीयाय नमः | Om advitīyāya namaḥ |
| 7 | ॐ अनिकेताय नमः | Om aniketāya namaḥ |
| 8 | ॐ अनुशासनप्रियाय नमः | Om anuśāsanapriyāya namaḥ |
| 9 | ॐ अन्तःसाक्षिणे नमः | Om antaḥsākṣiṇe namaḥ |
| 10 | ॐ अन्तर्यामिने नमः | Om antaryāmine namaḥ |
| 11 | ॐ आनन्दाय नमः | Om ānandāya namaḥ |
| 12 | ॐ आत्मस्वरूपाय नमः | Om ātmasvarūpāya namaḥ |
| 13 | ॐ आङ्ग्लभाषा विदुत्तमाय नमः | Om āṅglabhāṣā viduttamāya namaḥ |
| 14 | ॐ ईश्वराय नमः | Om īśvarāya namaḥ |
| 15 | ॐ उदारहृदयाय नमः | Om udārahṛdayāya namaḥ |
| 16 | ॐ उत्साहवर्धकाय नमः | Om utsāhavardhakāya namaḥ |
| 17 | ॐ एकस्मै नमः | Om ekasmai namaḥ |
| 18 | ॐ ओङ्कारविदे नमः | Om oṅkāravide namaḥ |
| 19 | ॐ करुणासागराय नमः | Om karuṇāsāgarāya namaḥ |
| 20 | ॐ कर्मपरायणाय नमः | Om karmaparāyaṇāya namaḥ |
| 21 | ॐ कालातीताय नमः | Om kālātītāya namaḥ |
| 22 | ॐ कैवल्यस्वरूपाय नमः | Om kaivalyasvarūpāya namaḥ |
| 23 | ॐ कृतात्मने नमः | Om kṛtātmane namaḥ |

| | | |
|---|---|---|
| 24 | ॐ कृतकृत्याय नमः | Om kṛtakṛtyāya namaḥ |
| 25 | ॐ गीताज्ञानयज्ञप्रचारकाय नमः | Om gītājñānayajñapracārakāya namaḥ |
| 26 | ॐ गुरवे नमः | Om gurave namaḥ |
| 27 | ॐ गुणातीताय नमः | Om guṇātītāya namaḥ |
| 28 | ॐ ग्रन्थकृते नमः | Om granthakṛte namaḥ |
| 29 | ॐ चिन्मयाय नमः | Om cinmayāya namaḥ |
| 30 | ॐ छिन्नसंशयाय नमः | Om chinnasaṁśayāya namaḥ |
| 31 | ॐ जगदात्मने नमः | Om jagadātmane namaḥ |
| 32 | ॐ जगत्साक्षिणे नमः | Om jagatsākṣiṇe namaḥ |
| 33 | ॐ जनप्रियाय नमः | Om janapriyāya namaḥ |
| 34 | ॐ जितेन्द्रियाय नमः | Om jitendriyāya namaḥ |
| 35 | ॐ जीवब्रह्मैक्यविदे नमः | Om jīvabrahmaikyavide namaḥ |
| 36 | ॐ जीवन्मुक्ताय नमः | Om jīvanmuktāya namaḥ |
| 37 | ॐ जीर्णमन्दिरोद्धारकाय नमः | Om jīrṇamandiroddhārakāya namaḥ |
| 38 | ॐ तपोवनशिष्याय नमः | Om tapovanaśiṣyāya namaḥ |
| 39 | ॐ तपस्विने नमः | Om tapasvine namaḥ |
| 40 | ॐ तापनाशनाय नमः | Om tāpanāśanāya namaḥ |
| 41 | ॐ तीर्थस्वरूपाय नमः | Om tīrthasvarūpāya namaḥ |
| 42 | ॐ तेजस्विने नमः | Om tejasvine namaḥ |
| 43 | ॐ देहातीताय नमः | Om dehātītāya namaḥ |
| 44 | ॐ द्वन्द्वातीताय नमः | Om dvandvātītāya namaḥ |
| 45 | ॐ दृढनिश्चयाय नमः | Om dṛḍhaniścayāya namaḥ |
| 46 | ॐ धर्मसंस्थापकाय नमः | Om dharmasaṁsthāpakāya namaḥ |
| 47 | ॐ धीमते नमः | Om dhīmate namaḥ |
| 48 | ॐ धीराय नमः | Om dhīrāya namaḥ |
| 49 | ॐ धैर्यप्रदाय नमः | Om dhairyapradāya namaḥ |

| | | |
|---|---|---|
| 50 | ॐ नारायणाय नमः | Om nārāyaṇāya namaḥ |
| 51 | ॐ निजानन्दाय नमः | Om nijānandāya namaḥ |
| 52 | ॐ निरपेक्षाय नमः | Om nirapekṣāya namaḥ |
| 53 | ॐ निस्स्पृहाय नमः | Om nissprhāya namaḥ |
| 54 | ॐ निरुपमाय नमः | Om nirupamāya namaḥ |
| 55 | ॐ निर्विकल्पाय नमः | Om nirvikalpāya namaḥ |
| 56 | ॐ नित्याय नमः | Om nityāya namaḥ |
| 57 | ॐ निरञ्जनाय नमः | Om nirañjanāya namaḥ |
| 58 | ॐ परमाय नमः | Om paramāya namaḥ |
| 59 | ॐ परब्रह्मणे नमः | Om parabrahmaṇe namaḥ |
| 60 | ॐ पावनाय नमः | Om pāvanāya nama |
| 61 | ॐ पावकाय नमः | Om pāvakāya namaḥ |
| 62 | ॐ पुरुषोत्तमाय नमः | Om puruṣottamāya namaḥ |
| 63 | ॐ प्रसन्नात्मने नमः | Om prasannātmane namaḥ |
| 64 | ॐ फलासक्तिरहिताय नमः | Om phalāsaktirahitāya namaḥ |
| 65 | ॐ बहुभक्ताय नमः | Om bahubhaktāya namaḥ |
| 66 | ॐ बन्धमोचकाय नमः | Om bandhamocakāya namaḥ |
| 67 | ॐ ब्रह्मनिष्ठाय नमः | Om brahmaniṣṭhāya namaḥ |
| 68 | ॐ ब्रह्मपराय नमः | Om brahmaparāya namaḥ |
| 69 | ॐ भयनाशनाय नमः | Om bhayanāśanāya namaḥ |
| 70 | ॐ भारतगौरवाय नमः | Om bhāratagauravāya namaḥ |
| 71 | ॐ भूम्ने नमः | Om bhūmne namaḥ |
| 72 | ॐ महावाक्योपदेशकाय नमः | Om mahāvākyopadeśakāya namaḥ |
| 73 | ॐ महर्षये नमः | Om maharṣaye namaḥ |
| 74 | ॐ मधुरस्वभावाय नमः | Om madhurasvabhāvāya namaḥ |
| 75 | ॐ मनोहराय नमः | Om manoharāya namaḥ |

| | | |
|---|---|---|
| 76 | ॐ महात्मने नमः | Om mahātmane namaḥ |
| 77 | ॐ मेधाविने नमः | Om medhāvine namaḥ |
| 78 | ॐ यतात्मने नमः | Om yatātmane namaḥ |
| 79 | ॐ यज्ञकृते नमः | Om yajñakṛte namaḥ |
| 80 | ॐ लोकप्रसिद्धाय नमः | Om lokaprasiddhāya namaḥ |
| 81 | ॐ वाग्मिने नमः | Om vāgmine namaḥ |
| 82 | ॐ विभवे नमः | Om vibhave namaḥ |
| 83 | ॐ विनोदप्रियाय नमः | Om vinodapriyāya namaḥ |
| 84 | ॐ विनयशीलाय नमः | Om vinayaśīlāya namaḥ |
| 85 | ॐ वीतरागाय नमः | Om vītarāgāya namaḥ |
| 86 | ॐ वेदान्तवेद्याय नमः | Om vedāntavedyāya namaḥ |
| 87 | ॐ शान्ताय नमः | Om śāntāya namaḥ |
| 88 | ॐ शान्तिप्रदाय नमः | Om śāntipradāya namaḥ |
| 89 | ॐ शास्त्रोद्धारकाय नमः | Om śāstroddhārakāya namaḥ |
| 90 | ॐ शुद्धसत्वाय नमः | Om śuddhasatvāya namaḥ |
| 91 | ॐ श्रुतिपारगाय नमः | Om śrutipāragāya namaḥ |
| 92 | ॐ श्रोत्रियाय नमः | Om śrotriyāya namaḥ |
| 93 | ॐ संन्यासिने नमः | Om sannyāsine namaḥ |
| 94 | ॐ समबुद्धये नमः | Om samabuddhaye namaḥ |
| 95 | ॐ सच्चिदानन्दाय नमः | Om saccidānandāya namaḥ |
| 96 | ॐ सर्वहितचिन्तकाय नमः | Om sarvahitacintakāya namaḥ |
| 97 | ॐ सत्यसङ्कल्पाय नमः | Om satyasaṅkalpāya namaḥ |
| 98 | ॐ सन्तुष्टाय नमः | Om santuṣṭāya namaḥ |
| 99 | ॐ साधवे नमः | Om sādhave namaḥ |
| 100 | ॐ सुमनसे नमः | Om sumanase namaḥ |
| 101 | ॐ सुहृदे नमः | Om suhṛde namaḥ |

| | | |
|---|---|---|
| 102 | ॐ स्वयंज्योतिषे नमः | Om svayañjyotiṣe namaḥ |
| 103 | ॐ स्थितप्रज्ञाय नमः | Om sthitaprajñāya namaḥ |
| 104 | ॐ क्षमाशीलाय नमः | Om kṣamāśīlāya namaḥ |
| 105 | ॐ ज्ञानमूर्तये नमः | Om jñānamūrtaye namaḥ |
| 106 | ॐ ज्ञानयोगिने नमः | Om jñānayogine namaḥ |
| 107 | ॐ ज्ञानतृप्ताय नमः | Om jñānatṛptāya namaḥ |
| 108 | ॐ नित्यशुद्धबुद्धमुक्तस्वरूपाय नमः | Om nityaśuddhabuddhamuktasvarūpāya namaḥ |